# Bhavya-Bhuvanam Bharatam

# भव्य-भुवनं भारतम् (मातृगीतिका)

## Document Information

Text title : Bhavya Bhuvanam Bharatam (Matrigitika)

File name : bhavyabhuvanaMbhAratam.itx

Category : misc, sanskritgeet, hkmeher

Location : doc_z_misc_general

Author : Harekrishna Meher meher.hk at gmail.com

Transliterated by : Harekrishna Meher

Proofread by : Harekrishna Meher

Description/comments : Matrigitikanjali

Acknowledge-Permission: Dr. Harekrishna Meher

Latest update : October 22, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 22, 2023

*sanskritdocuments.org*

# भव्य-भुवनं भारतम् (मातृगीतिका)

जयतु जननी जन्म-भूमी
भव्य-भुवनं भारतम्,
विजयतां नो वन्दनीयं
सुन्दरं धामामृतम्,
भव्य-भुवनं भारतम् ॥ (ध्रुवम्) ॥

धरित्रीयं श्यामला,
कामधेनुः कोमला ।
रत्न-गर्भा शाश्वती,
कल्प-वल्ली भास्वती ।
विन्ध्य-भूषा सिन्धु-रशना हिमगिरि-शिखा शर्मदा,
रम्य-गङ्गा-सङ्ग-यमुना महानदीह नर्मदा ।
कर्म-तपसां सार्थ-तीर्थं प्रकृति-विभवालङ्कृतम्,
विजयतां नो वन्दनीयं सुन्दरं धामामृतम् ।
भव्य-भुवनं भारतम् ॥ १ ॥

बिभर्त्ति भूति-सम्पदम्,
राष्ट्रमिदं हि शं-पदम् ।
वैरि-लोचन-बाष्पदम्,
सत्कलाया आस्पदम् ।
सांस्कृतिक्या एकतायाः पुञ्जिता सञ्जीवनी,
मङ्गलमयी रङ्ग-ललिता निखिल-सुखदा लेखनी ।
प्रेम-जगतां जैत्र-गीतं विबुध-हृदये झङ्कृतम्,
विजयतां नो वन्दनीयं सुन्दरं धामामृतम् ।
भव्य-भुवनं भारतम् ॥ २ ॥

साभ्युदयता-द्योतिनी,

सदाचार-विवर्द्धिनी ।
लभ्यते सा सभ्यता,
भाति दिव्या नव्यता ।
चतुर्वर्गद-शास्त्र-मार्गा यत्र विद्या विद्यते,
विश्व-मध्ये यदध्यात्मं तत्त्व-सारं कीर्त्यते ।
भारतीये मूल-मन्त्रे जयति सत्यं नानृतम्,
विजयतां नो वन्दनीयं सुन्दरं धामामृतम् ।
भव्य-भुवनं भारतम् ॥ ३॥

भूमिरियं सुचर्चिता,
धीर-वीरैरर्चिता ।
प्राच्य-परिचय-गौरवा,
शुभा प्रतिभा-वैभवा ।
यत्र भाषा-वेष-भूषा-रीति-चलनै-र्विविधता,
तथाप्येका दीप्यमाना राजते जातीयता ।
एक-मातुः सुताः सर्वे भ्रातृ-साम्यं सत्कृतम्,
विजयतां नो वन्दनीयं सुन्दरं धामामृतम् ।
भव्य-भुवनं भारतम् ॥ ४॥

स्वार्जितैरूर्जस्वलम्,
ज्ञान-दीपैरुज्ज्वलम् ।
शान्त्यहिंसा-सद्बलम्,
त्याग-सेवा-पुष्कलम् ।
यत् त्रिरङ्गं ध्वजं विदधद् वर्षमार्षं पूज्यते,
लोकतन्त्रं सार्वभौमं स्वीय-भूम्ना मान्यते ।
ऐक्य-मैत्री-भाव-सूत्रं परम्परया सम्भृतम्,
विजयतां नो वन्दनीयं सुन्दरं धामामृतम् ।
भव्य-भुवनं भारतम् ॥ ५॥

यद् “वसुधा कुटुम्बकम्”,
निगदितं दिग्दर्शकम् ।
अम्बर-चुम्बि-चुम्बकम्,
सकल-मानस-कर्षकम् ।
मानविकता-मानयित्री यत्र वागविनश्वरा,

स्वर्ण-वर्णा प्रीति-पूर्णा महामहिमा सुस्वरा ।
विश्व-बन्धो-र्मधुर-गन्धं यशो यस्मिन् विस्तृतम्,
विजयतां नो वन्दनीयं सुन्दरं धामामृतम् ।
भव्य-भुवनं भारतम् ।
भारतम्, भारतम्, भारतम् ॥ ६ ॥

– गीति-रचना: डॉ हरेकृष्ण-मेहेरः
(मातृगीतिकाञ्जलिः-काव्यतः)

(Composed in self-innovated original new lyrical maatraa-metre, which has been named 'BhavyA')

Copyright Dr.Harekrishna Meher

*Bhavya-Bhuvanam Bharatam*
pdf was typeset on October 22, 2023

Please send corrections to *sanskrit@cheerful.com*